# ॥ जटायुकृत-रामस्तोत्रम् ॥

## जटायुरुवाच

अगणितगुणमप्रमेयमाद्यं
सकलजगत्स्थितिसंयमादिहेतुम् ।
उपरमपरमं परात्मभूतं
सततमहं प्रणतोऽस्मि रामचन्द्रम् ॥ ४४ ॥

निरवधिसुखमिन्दिराकटाक्षं
क्षपितसुरेन्द्रचतुर्मुखादिदुःखम् ।
नरवरमनिशं नतोऽस्मि रामं
वरदमहं वरचापबाणहस्तम् ॥ ४५ ॥

त्रिभुवनकमनीयरूपमीड्यं
रविशतभासुरमीहितप्रदानम् ।
शरणदमनिशं सुरागमूले
कृतनिलयं रघुनन्दनं प्रपद्ये ॥ ४६ ॥

भवविपिनदवाग्निनामधेयं
भवमुखदैवतदैवतं दयालुम् ।
दनुजपतिसहस्रकोटिनाशं
रवितनयासदृशं हरिं प्रपद्ये ॥ ४७ ॥

अविरतभवभावनातिदूरं
भवविमुखैर्मुनिभिः सदैव दृश्यम् ।
भवजलधिसुतारणाङ्घ्रिपोतं
शरणमहं रघुनन्दनं प्रपद्ये ॥ ४८ ॥

गिरिशगिरिसुतामनोनिवासं
गिरिवरधारिणमीहिताभिरामम्।
सुरवरदनुजेन्द्रसेविताङ्घ्रिं
सुरवरदं रघुनायकं प्रपद्ये॥४९॥

परधनपरदारवर्जितानां
परगुणभूतिषु तुष्टमानसानाम्।
परहितनिरतात्मनां सुसेव्यं
रघुवरमम्बुजलोचनं प्रपद्ये॥५०॥

स्मितरुचिरविकासिताननाब्ज-
मतिसुलभं सुरराजनीलनीलम्।
सितजलरुहचारुनेत्रशोभं
रघुपतिमीशगुरोर्गुरुं प्रपद्ये॥५१॥

हरिकमलजशम्भुरूपभेदात्
त्वमिह विभासि गुणत्रयानुवृत्तः।
रविरिव जलपूरितोदपात्रे-
ष्वमरपतिस्तुतिपात्रमीशमीडे ॥५२॥

रतिपतिशतकोटिसुन्दराङ्गं
शतपथगोचरभावनाविदूरम्।
यतिपतिहृदये सदा विभातं
रघुपतिमार्तिहरं प्रभुं प्रपद्ये॥५३॥

इत्येवं स्तुवतस्तस्य प्रसन्नोऽभूद् रघूत्तमः।
उवाच गच्छ भद्रं ते मम विष्णोः परं पदम्॥५४॥

श‍ृणोति य इदं स्तोत्रं लिखेद्वा नियतः पठेत्।
स याति मम सारूप्यं मरणे मत्स्मृतिं लभेत्॥५५॥

इति राघवभाषितं तदा
श्रुतवान् हर्षसमाकुलो द्विजः।
रघुनन्दनसाम्यमास्थितः
प्रययौ ब्रह्मसुपूजितं पदम्॥५६॥

॥इति श्रीमदध्यात्मरामयणे उमामहेश्वरसंवादे अरण्यकाण्डे अष्टमे सर्गे जटायुकृतं श्री-रामस्तोत्रं सम्पूर्णम्॥

This stotra can be accessed in multiple scripts at:
http://stotrasamhita.net/wiki/Jatayukrta_Rama_Stotram.

generated on **March 29, 2026**

Downloaded from http://stotrasamhita.github.io | StotraSamhita | Credits